संस्कृतवार्ता:

10.08.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्र-मोदी केरल प्रान्ते भूस्खलेन दुष्प्रभावितेषु क्षेत्रेषु एकं क्षेत्रं चूरामाला सम्प्राप्तवान्। प्रधानमन्त्री विश्रान्त्युद्धार कार्येषु संलग्नै: सैन्यकर्मिभि: सह वार्तां कृतवान्।
- राष्ट्रपति: द्रौपदी मुर्मु: तिमोर-लेस्टे- इत्यस्य सर्वोच्च-नागरिक-सम्मानेन ग्रेंडकॉलर ऑफ ऑर्डर इत्यनेन सम्मानितवती ।
- वित्तमंत्री निर्मला सीतारामन: बैंक-इत्यत्र 'कोर-बैंकिंग' इत्यत्र विशेषरूपेण ध्यानं प्रदत्तवती ।
- भारतीय-ऋतु-विज्ञान-विभागेन देशस्य उत्तरीय-प्रभागेषु वृष्टे: अनुमानभिव्यक्तम्।

<u>वायनाड-प्रधामन्त्री</u>

प्रधानमन्त्री नरेन्द्र-मोदी केरल प्रान्ते जुलाई मासस्य त्रिंशत्- दिनाङ्के संजातेन भूस्खलनेन दुष्प्रभावितेषु क्षेत्रेषु एकं क्षेत्रं चूरामालां सम्प्राप्तवान्। स: वायनाडस्य भूस्खलनेन प्रभावितानां क्षेत्राणां यात्रायाम् अस्ति। प्रधानमन्त्री विश्रान्त्युद्धार कार्येषु संलग्नै: सैन्यकर्मिभि: सह वार्तां कृतवान्। मोदिना सह राज्यपाल: आरिफ-मोहम्मद-खान: मुख्यमन्त्री पिनराई विजयन:, केन्द्रीय-मन्त्री सुरेश-गोपी एते आसन्।

<u>राष्ट्रपति: तिमोर:</u>

राष्ट्रपति: द्रौपदी मुर्मु: तिमोर-लेस्टे- इत्यस्य सर्वोच्च-नागरिक-सम्मानेन ग्रेंडकॉलर ऑफ ऑर्डर इत्यनेन सम्मानितवती। राष्ट्रपतिना जोसे-रामोस तो र्ता- वर्येण डिलि स्थाने राष्ट्रपति प्रासादे तस्मै सम्मानमिदं अलंङ्कृतम्। अवसरेऽस्मिन् राष्ट्रपतिना श्रीमत्या द्रौपदी-मुर्मु वर्यया तत्रत्य राष्ट्रपतिना हो र्ता- प्रधानमन्त्रिणा गुसमाओ वर्येण समं द्विपाक्षिक-सहयोग-सम्बन्धे सम्भाषणमपि विहितम्।

## वित्तमंत्री

वित्तमंत्री निर्मला सीतारामन: बैंक-इत्यत्र 'कोर-बैंकिंग' इत्यत्र विशेषरूपेण ध्यानं प्रदानाय बलं प्रदत्तवती। अद्य नवदिल्लयां रिजर्व-बैंक-इत्यस्य केन्द्रीय-निदेशक-मण्डलस्य उपवेशने वित्तमंत्री बैंक-इत्यत्र संचित-ऋण-राशिभि: सम्बद्धानि प्रमुखानि कार्याणि प्रथमिकतां प्रदातुमु उक्तवती।

वित्तमंत्री उक्तवती यत् सर्वकार: बैंक-इत्यस्य नियमे संशोधनमानयति। यस्य दीर्घकालेन प्रतीक्षा आसीत्।

## जम्मू-कश्मीर: आतंक:

जम्मू-कश्मीरे अद्य कठुआ- आरक्षिभि: चतुर्णामातंकवादिनां रेखाचित्रं प्रसारितम्। आरक्षिभि: प्रत्येकमातंक-वादिनां विषये सूचना-प्रदाने सति पञ्च-लक्ष-रूप्यकाणां पुरस्कार: घोषित:। आतंवादिनां विषयिकां सूचनां य: प्रदास्यति तस्य अभिज्ञानं पूर्णतया गोपनीयं भविता।

## ऋतुविभाग:

भारतीय-ऋतु-विज्ञान-विभागेन श्व: यावत् देशस्य उत्तरीय-प्रभागेषु भीषणातिभीषण वृष्टे: अनुमानभिव्यक्तम् विभागेनोक्तं यत् अद्य हिमाचल-प्रदेशे-श्व: यावत् उत्तराखण्ड-पूर्वी राजस्थानस्य बहुषु क्षेत्रेषु भीषण वर्षा भविष्यति इति संभाव्यते। सप्ताहावधौ मध्यप्रदेशे-विदर्भ-छत्तीसगढ-कोंकण-गोवा-गुजरातस्य क्षेत्रेषु मध्यम-वर्षाया: सम्भावना प्रकाशिता। तमिलनाडु-पुद्दुचेरी-कराईकल-केरल-माहे-लक्षद्वीप-कर्णाटके च वृष्टे: सूचना सम्प्राप्तास्ति।

## विदेश-मन्त्री

विदेश मन्त्रिणा सुब्रह्मणयम जयशंकरेण प्रतिपादितं यत् प्रशासनं भारत-मालदीव-अन्य-क्षेत्रीय-जनानां लाभाय मालदीव-देशेन सार्धं घनिष्ठ-सम्बन्धान् प्रति वचनबद्धं वर्तते। डॉ. जयशंकर: त्रि-दिवसीय-यात्रायै मालदीव-देशे वर्तते। तेन राष्ट्रपतिनम् डॉ.मोहम्मद-मुइज्जु वर्येण समं सम्भाषणमपि विहितम्। तयो: मध्ये रक्षा-सुरक्षा सम्बद्ध-सहयोग-सामुद्रिक-सुरक्षायै संयुक्त-पदक्षेपानां विषये शान्ति-स्थिरतां च सन्धारयितुं तेषां हितानां विषये चर्चा जाता। विदेश-मन्त्रिणा आर्थिक-विकास-व्यापार-मन्त्री-वित्तमन्त्री-मालदीव-मौद्रिक-प्राधिकरणस्य प्रमुखेण समंपि चर्चा

अपि सञ्जाता। डॉ. जयशंकरेण मालदीव-देशस्य अष्टाविंशति-द्वीपेषु जल-स्वच्छता-सम्बद्ध-परियोजनानां अपि आभासीय-तन्त्रांशस्य उद्घाटनं कृतम्।

<u>ब्राजील-दुर्घटना</u>

ब्राजील-देशे साओ पावलो स्थले एकस्यां वैमानिक-दुर्घटनायां एक षष्टिः जनाः मृत्युमुपगताः। विमानेऽस्मिन् सप्तपञ्चाशत् यात्रिणः, चालक-दलस्य चतुर्षु सदस्येषु सर्वेजनाः हताः सूच्यन्ते। विमानं वासतव्य-स्थाने अपतत्। कारणात् अस्मात् भवनमेकमपि क्षतिग्रसतं जातम्। दुर्घटनामिमालक्ष्य तत्रत्य राष्ट्रपतिना लुईस-इनात्रियो लुला-द-सिल्वा वर्येण मृतकानां जनानां परिजनेभ्यः संवेदनाः प्रकटिताः।

<u>प्रधानमन्त्री विश्व-सिंह-दिवसः</u>

विश्व-सिंह-दिवसः अद्य आमान्यते। अवसरेऽस्मिन् प्रधानमन्त्रिणा नरेन्द्रमोदिना सर्वेभ्यः सिंहाभ्यरण्य-संरक्षण-कार्य कर्तृभ्यः सिंहानां रक्षणे ध्यान-प्रदानार्थं उक्तम्। जनसञ्चार माध्यमेन प्रधानमन्त्रिणा भणितं यत् सिंहानां सर्वाधिक-संख्या गुजरात-राजयस्य गिर-इति अभ्यारण्य-उद्याने वर्तते। तेन प्रोक्तं यत् वर्षाभ्यन्तरे सिंहानां संख्या वर्धिता, यत् तेषां सकारात्मक-विकासाय भद्रतमा वर्तते।

<u>विश्व-सिंह-दिवसः</u>

अद्य-विश्व-सिंह-दिवसः परिपाल्यते। गुजरात राज्यस्य सासन-गिर-अभ्यारण्ये मुख्यमन्त्रिणः भूपेन्द्र-पटेलस्य उपस्थितौ एकः मुख्य-समारोहः समायोज्यते। सौराष्ट्रस्य एकादश-जनपदेषु बहवः भव्योत्सवाः आयोज्यन्ते। एतेषु एकादश-सहस्राधिकानि शैक्षणिक-संस्थानानि भागं गृहणन्ति। आयोजनस्य उद्देश्यं गुजरात-राज्ये एशियाई-सिंहानां संरक्षण-विषये जागरूकतायाः विवर्धनम्।

## बांग्लादेश

बांग्लादेशे, सर्वोच्च-न्यायालस्य न्यायाधीशा: ओबैदुल-हसन: पदपरित्याग-पत्रं निर्णीतवान्। असौ औपचारिक-कार्याणां प्रपूर्त्यनन्तरं राष्ट्रपतिने पदपरित्याग पत्रं सर्मपयिष्यति। इति स: वार्ताहरान् मध्याह्ने सूचितवान्।

## प्रधानमन्त्री-नागर-आवास-योजना

प्रधानमन्त्री-नागर-आवास-योजनाया: द्वितीय-चरणं अनुमोदितम्। मन्त्रिमण्डलेन प्रवर्तमान-आगामि-वर्षाय च कृते प्रधानमन्त्रि-ग्रामीण-आवास-योजना-प्रभाविचरणाय अपि अनुमति: प्रदत्ता। सन्दर्भेऽस्मिन् सूचना-प्रसारण-मन्त्रिणा अश्विनी वैष्णव-वर्येण ह्य: प्रतिपादिता यत् योजनान्तर्गतं द्वि-कोट्यधिक-ग्रामीण-क्षेत्रषु, कोट्यधिक-नागर-क्षेत्रेषु आवासा: निर्मास्यन्ते।

## स्वास्थ्य मंत्री

स्वास्थ्य-राज्य-मन्त्री प्रतापराव-जाधव: 'लिम्फैटिक फाइलेरिया-गज-पादस्य उन्मूलनाय अद्य नवदिल्ल्यां औषध-पानस्य द्विवार्षिकस्य राष्ट्रव्यापिन: अभियानस्य द्वितीय-चरणस्य आभासीयं आरम्भं कृतवान्। श्रीजाधव: प्रोक्तवान् यत् 'लिम्फैटिक-फाइलेरिया गजपादस्य अवरोधनाय मसकानां कर्तनात् निवारणम् फाइलेरिया-रोधिनां औषधानां पानमस्ति महत्वपूर्णा: उपाया:। विंशति राज्यानाम् केन्द्र शासित प्रदेशानां जना: सन्ति अनेन प्रभाविता:।

## अन्तरिक्षदिवसः

आपद् - प्रबन्धनस्य राष्ट्रियसंस्थाने आपदप्रबन्धने अन्तरिक्ष प्रौद्योगिक्याः विषये एकदिवसीयराष्ट्रीयकार्यशालायाः आयोजनं कृत्वा प्रथमः राष्ट्रियः अन्तरिक्षदिवसः चतुश्चत्वारिंशत् उत्तर द्विसहस्रं आयोजित:।

।। इति वार्ताः।।